# [1]का शि का

## द्वितीयोऽध्यायः

## प्रथमः पादः

### समर्थः पदविधिः । (१/६४७)

परिभाषेयम् । यः कश्चिदिह शास्त्रे पदविधिः [2]श्रूयते स समर्थो वेदितव्यः । [3]विधीयते इति विधिः[4] । पदानां विधिः पदविधिः । स [5]पुनः समासादिः । समर्थः शक्तः । विग्रहवाक्यार्थाभिधाने यः शक्तः [6]स समर्थो वेदितव्यः । अथ वा समर्थपदाश्रयत्वात् [7]समर्थः । समर्थानां पदानां सम्बद्धार्थानां[8] संसृष्टार्थानां[9] विधिर्वेदितव्यः । वक्ष्यति, 'द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः' (२.१.२४/६८६)[10] – कष्टं श्रितः कष्टश्रितः । समर्थग्रहणं किम् ? पश्य देवदत्त कष्टं, श्रितो विष्णुमित्रो गुरुकुलम् (म. भा. १. ३५६) । 'तृतीया तत्कृतार्थेन गुणवचनेन' (२. १. ३०/६९२) – शङ्कुलया खण्डः शङ्कुलाखण्डः[11] । समर्थग्रहणं किम् ? [12]किं त्वं करिष्यसि शङ्कुलया, खण्डो[13] देवदत्त उपलेन । 'चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः' (२. १. ३६/६९८) – यूपाय दारु यूपदारु[14] । समर्थग्रहणं किम् ? गच्छ त्वं यूपाय, दारु देवदत्तस्य [15]गेहे । 'पञ्चमी भयेन' (२.१.३७/६९९) – वृकेभ्यो भयं वृकभयम् । समर्थग्रहणं किम् ? गच्छ त्वं मा वृकेभ्यो, [16]भयं देवदत्तस्य यज्ञदत्तात् (म. भा. १. ३६०) । 'षष्ठी' (२. २. ८/७०२) -- राज्ञः पुरुषः राजपुरुषः[17] । समर्थग्रहणं किम् ? भार्या राज्ञः, पुरुषो देवदत्तस्य (म.भा.१. ३६०) । 'सप्तमी शौण्डैः' (२.१.४०/७१७) –अक्षेषु शौण्डः अक्षशौण्डः । [18]समर्थग्रहणं किम्? [19]शक्तस्त्वं अक्षेषु, शौण्डः पिबति पानागारे (म.भा.१.३६०) । पदग्रहणं किम् ? वर्णविधौ [20]समर्थपरिभाषा मा भूत् । तिष्ठतु दध्यशान त्वं शाकेन । तिष्ठतु कुमारी च्छत्रं हर[21]देवदत्तात् (म.भा.१.३६९) । यणादेशो (६.१.७७/४७), नित्यश्च तुग् (६.१.७५/१४८) भवति ॥

### सुबामन्त्रिते पराङ्गवत् स्वरे । (२/३६५३)

सुबन्तमामन्त्रिते परतः परस्याङ्गवद् भवति, स्वरे स्वरलक्षणे [22]कर्तव्ये । तादात्म्यातिदेशोऽयम् । सुबन्तमामन्त्रितमनुप्रविशति । वक्ष्यति – '[23]आमन्त्रितस्य च' (६.१.१९८/३३५३) । आमन्त्रितस्यादिरुदात्तो भवति[24] । [25]ससुप्कस्यापि यथा स्यात् । कुण्डेनाटन् । परशुना वृश्चन् । मद्राणां राजन् । [26]कश्मीराणां राजन् । सुप् इति किम् ? पीडचे पीडचमान । आमन्त्रिते इति किम् ? गेहे गार्ग्यः । परग्रहणं किम् ? पूर्वस्य मा भूत् । देवदत्त, कुण्डेनाटन् । अङ्गग्रहणं किम् ? यथा मृत्पिण्डीभूतः स्वरं लभेत । उभयोराद्युदात्तत्वं मा भूत् ।

---

1. श्रीपरमात्मने नमः क, श्रीगणेशाय नमः ड, प्रशान्तगणपतये नमः फ. 2. श्रूयते नास्ति क, स सर्वः ब.क.ड. इ. ह. 3. विधीयते – अथवा नास्ति ह. 4. कार्यमित्यर्थः इत्यधिकम् क. 5. पुनः नास्ति ब. क. ड. इ. ह. 6. स नास्ति फ. 7. समर्थः नास्ति फ. 8. च इत्यधिकम् क. 9. च इत्यधिकम् ब. क. इ. ह, वा. फ. 10. इति इत्यधिकम् ह. 11. किरिकाणः इत्यधिकम् क. 12. किं त्वं नास्ति ब. 13. असौ इत्यधिकम् क. 14. कुण्डलाय हिरण्यम् कुण्डलहिरण्यम् इत्यधिकम् क. 15. गृहे क. ड. ह, तिष्ठति इत्यधिकम् ह. 16. भयं देवदत्तात् यज्ञदत्तस्य ड. 17. ब्राह्मणकम्बलः इत्यधिकम् क. इ. 18. अक्षधूर्तः इत्यधिकम् क. 19. सक्तः फ. ह. 20. समर्थपरि– भाषा नास्ति फ. 21. देवदत्त ड. इ. फ. 22. कार्ये क. ड. इ. ह. 23. सूत्रमिदं नास्ति ब. क. 24. इति इत्यधिकम् ड. 25. स तु एकस्यापि ब. 26. काश्मीराणाम् ग.